**R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र १ ले**

**विषयः पंचतंत्र काकोलूकीयम्** (19R414)

**दिनांक :०१/०७/२०२२** **गुण : ६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. समुचितं पर्यायं चिनुत।** **(०४)**

१. क्रूराक्षः ............. मन्त्री। (अरिमर्दनस्य, मेघवर्णस्य, दीप्ताक्षस्य)
२. पिशाचः .......... भोक्तुमिच्छति स्म। (ब्राह्मणं, चौरं, गोयुगं, ब्राह्मण गोयुगं च)
३. यस्य पुरीषे सुवर्णमुत्पद्यते सः पक्षी .............. । (वक्रनासः, सिन्धुकः, हरिदत्तः)
४. दीनारं यच्छन्तं भुजङ्गमं .............. हतवान्। (ब्राह्मणः, ब्राह्मणपुत्रः, उलूकः)

**प्र.२.अ) रूपपरिचयं लिखत। (केषाञ्चित् पञ्चानाम्)** **(०५)**

१. करिष्यामि २. निरूप्य ३. तैः ४. क्षुद्रस्य
५. भर्तारम् ६. आत्मानम्

**आ) सन्धीन् विघटयत। (केषाञ्चित् चतुर्णाम्)** **(०४)**

१. अहमस्य २. तयोर्विवदतोः ३. चौरोऽब्रवीत् ४. गत्वैकान्ते
५. श्रुत्वोत्थाय ६. मयाऽपहृते

**इ) सूचनानुसारं परिवर्तयत** **(०४)**

१. मया सर्वेऽपि वैरिणः हताः। (वाच्यपरिवर्तनं कुरुत।)
२. काकः ज्वलन्ती वनकाष्ठिकां गृहीत्वा स्थिरजीविकुलाये प्राक्षिपत। (पूर्वकालवाचकं निष्कासयत।)
३. भवान् अपि आत्मानं निवेदयतु। (भवान् स्थाने, त्वं इति कर्तृपदं योजयत)
४. अस्ति कस्मिंश्चिदधिष्ठाने चित्ररथः नाम राजा। (वाक्यं लङ्लकारे परिवर्तयत।)
५. मन्त्रिणः प्रोचुः। (वाक्यम् एकवचने परिवर्तयत।)

**प्र.३. केषाञ्चिद् त्रयाणां ससन्दर्भं स्पष्टीकरणं लिखत।** **(१५)**

१. न विश्वसेत्पूर्वविरोधितस्य शत्रोश्च मित्रत्वमुपागतस्य।
२. शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छगलादिव।
३. राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्।
४. स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः।

**प्र.४. त्रयाणामनुवादं माध्यमभाषायां कुरुत।** (१८)

१. अथ मुनिना रविराहूतः। वेदमन्त्रमन्त्रजप्रभावात् तत्क्षणादेवोपगम्यादित्यः प्रोवाच भगवन्। किमहमाहूतः सोऽब्रवीत् एषा मदीया कन्यका तिष्ठति। यद्येषा त्वां वृणोति तर्ह्युद्वहस्व इति। एवमुक्त्वा स्वदुहितरमुवाच पुत्रि किं तव रोचते एष भगवांस्त्रैलोक्यदीपो भानुः पुत्रिकाऽब्रवीत् तात अतिदहनात्मकोऽयं नाऽहमेनमभिलषामि। तदस्मादन्यः प्रकृष्टतरः कश्चिदाहूयताम्।
२. कश्चित्क्षुद्रसमाचारः प्राणिनां कालसन्निभः। विचचार महारण्ये घोरः शकुनिलुब्धकः।।

नैव कश्चित्सुहृत्तस्य न सम्बन्धी न बान्धवः। स तैः सर्वैः परित्यक्तस्तेन रौद्रेण कर्मणा।।
ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः। उद्वेजनीया भूतानां व्याला इव भवन्ति ते।।

३. कस्मिंश्चिद्वनोद्देशे खरनखरो नाम सिंहः प्रतिवसति स्म। स कदाचिदितश्चेतश्च परिभ्रमन क्षुत्क्षामकण्ठो न किञ्चिदपि सत्त्वमाससाद। ततश्चास्तमनसमये महतीं गिरिगुहामासाद्य प्रविष्टश्चिन्तयामास नूनमेतस्यां गुहायां रात्रौ केनापि सत्त्वेनागन्तव्यं तन्निभृतो भूत्वा तिष्ठामि। एतस्मिनन्तरे तत्स्वामी दधिपुच्छो नाम शृगालः समायातः। स च यावत्पश्यति तावत्सिंहपदपद्धतिर्गुहायां प्रविष्टा, न च निष्क्रमणं गता।

४. अस्ति कस्मिंश्चिदधिष्ठाने चित्ररथो नाम राजा। तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति। तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति। षण्मासे-षण्मासे पिच्छमेकैकं परित्यजन्ति। अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। तैश्चोक्तः - अस्माकं मध्ये त्वया न वस्तव्यम्। येन कारणेनास्माभिः षण्मासान्ते पिच्छैकैकदानं कृत्वा गृहीतमेतत्सरः। एवञ्च किं बहुना परस्परं द्वैधमुत्पन्नम्।

**प्र.५. काकोलूकीये विद्यमानां कामपि एकां कथां संस्कृतभाषया संक्षेपेण स्वशब्दैः लिखत।** (१०)

----------